विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ता:-०१/०६/२०२०  (बोर्ड बेस्ड क्वेश्चन)

अधोलिखितगद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-

गद्यांश:-  अथ पित्रा 'तथा'इति अनुज्ञात: स जीमूतवाहन: कल्पतरुम् उपगम्य उवाच-"देव! त्वया अस्मत्पूर्वेषाम् अभीष्टा :कामा: पूरिता :तन्ममैकं कामं पूरय । यथा पृथ्वीमदरिद्रां पश्यामि तथा करोतु देव" इति। एवंवादिनी जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि "इति वाक् तस्मात् तरोरुद्भूत्।

क्षणेन च स कल्पतरु दिवं समुत्पत्य भूवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यश: प्रथितम् ।

(१) एकपदेन उत्तरत-

(i) कल्पतरुम् उपगम्य उवाच?

(ii) क्षणेन स: कल्पतरु: किम् अवर्षत्?

(२) पूर्णवाक्येन उत्तरत-

(i) जीमूतवाहने एवं वादिनि कीदृशी /का वाक् तस्मात् तरोरुद्भूत्?

(ii) कथं सर्वत्र यश: प्रथितम्? तय

(३) भाषिककार्यम् -

(i) 'अभीष्टा: कामा:' अनयो :पदयो: विशेष्यपदं किम् अस्ति?

(क) कामा:  (ख) काम:  (ग) अभीष्ट:  (घ) अभीष्टा:

(ii) अनुच्छेदे 'वृक्षात्' इत्यस्य पदस्य क: पर्याय: आगत:

(क)तरो:  (ख)तरु:  (ग)तरोरुद

(घ)तरोरुदभूत्

(iii) "एषोऽहं यातोऽस्मि "।अत्र 'अहम् 'पदं कस्मै आगतम् ?

(क)पुत्राय  (ख)राजपुत्राय  (ग)नृपाय  (घ) तरवे

(iv) अनुच्छदे 'अवर्षत्' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(क) क्षणेन  (ख)च  (ग)कल्पतरु:

(घ)स: